## द्वितीयाध्यायस्य द्वितीयः पादः

### पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे। (१/७१२)

एकदेशोऽस्यास्ति इत्येकदेशी, अवयवी, [1]तद्वाचिना सुबन्तेन सह पूर्व अपर अधर उत्तर इत्येते शब्दाः सामर्थ्यादेकदेशवचनाः समस्यन्ते, तत्पुरुषश्च समासो भवति। [2]एकाधिकरणग्रहणमेकदेशिनो विशेषणम्। एकं चेदधिकरणमेकद्रव्यमेकदेशि भवति। षष्ठीसमासापवादोऽयं योगः। पूर्वं कायस्य पूर्वकायः। अपरकायः। [3]अधरकायः। उत्तरकायः। एकदेशिना इति किम्? [4]पूर्वं नाभेः कायस्य। एकाधिकरणे इति किम्? पूर्वं छात्राणामा[5]मन्त्रय। कथं मध्याह्नः, सायाह्नः इति? 'सङ्ख्याविसायपूर्वस्याह्नस्याहन्नन्यतरस्यां ङौ' (६.३.११०/२३८) इति ज्ञापकात् सर्वेणैकदेशशब्देनाह्नः समासो भवति॥

### अर्धं नपुंसकम्। (२/७१३)

एकदेशिना एकाधिकरणे इति वर्तते। [6]समप्रविभागेऽर्धशब्दो नपुंसकमाविष्टलिङ्गः, तस्येदं ग्रहणम्। अर्धम् इत्येतद् नपुंसकमेकदेशिनैकाधिकरणेन[7] समस्यते, तत्पुरुषश्च समासो भवति। षष्ठीसमासापवादोऽयं योगः। अर्धं पिप्पल्याः अर्धपिप्पली। [8]अर्धकोशातकी। नपुंसकम् इति किम्? ग्रामार्धः। नगरार्धः। एकदेशिना [9]इत्येव, अर्धं पशोर्देवदत्तस्य। [10]देवदत्तेन सह समासो न भवति। एकाधिकरणे इत्येव, अर्धं पिप्पलीनाम्॥

### द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम्। (३/७१४)

एकदेशिना एकाधिकरणे इति वर्तते। षष्ठीसमासापवादोऽयं[11] योगः। अन्यतरस्यांग्रहणात्[12] सोऽपि षष्ठीसमासो भवति। '[13]पूरणगुण°' (२.२.११/७०५) इति प्रतिषेधश्च [14]अत एवान्यतरस्यांग्रहणसामर्थ्यान्न प्रवर्तते। द्वितीयादीनि शब्दरूपाणि एकदेशिनैकाधिकरणेन सहा[15]न्यतरस्यां समस्यन्ते, तत्पुरुषश्च समासो भवति। द्वितीयं भिक्षायाः द्वितीयभिक्षा, [16]षष्ठीसमासपक्षे भिक्षाद्वितीयं वा। [17]तृतीयं भिक्षायाः तृतीयभिक्षा, भिक्षातृतीयं वा। [18]चतुर्थं भिक्षायाः चतुर्थभिक्षा, [19]भिक्षाचतुर्थं वा। तुर्यं भिक्षायाः तुर्यभिक्षा, भिक्षातुर्यं [20]वा। [21]तुरीयशब्दस्यापीष्यते। तुरीयं भिक्षायाः तुरीयभिक्षा, भिक्षातुरीयं वा। एकदेशिना इत्येव, द्वितीयं भिक्षाया भिक्षुकस्य। एकाधिकरणे इत्येव, द्वितीयं भिक्षाणाम्॥

---

1. तद्वाचिनः क. 2. एकाधिकरणे क, वाक्यमिदं नास्ति फ. 3. नास्ति ग.फ. 4. अत्र नाभिशब्देन सह समासो न भवति इत्यधिकम् अ. 5. आमन्त्रयस्व क. 6. समप्रविभागयोः ह. 7. सह इत्यधिकम् फ. 8. अर्धं कौशातक्याः इत्यधिकम् क.ड.इ.फ. 9. इति किम् इ. 10. देवदत्तशब्देन क.ड.इ.फ.ह.ग, सह नास्ति इ. 11. अयं योगः नास्ति फ. 12. पक्षे इत्यधिकम् फ. ड. 13. पूरणेनेति ड. 14. अत नास्ति इ. फ. 15. अन्यतरस्यां नास्ति फ. 16. षष्ठीसमासपक्षे नास्ति ड.ई. 17–18. एते उदाहरणे न स्तः फ. 19. भिक्षाचतुर्थी क. 20. वा नास्ति ड. 21. तुरीय––भिक्षातुरीयं वा नास्ति ड.इ.फ.ह.